शास्त्रा भुजंग स्तोत्रं

श्रितानंदचिंतामणिश्रीनिवासं
सदा सच्चिदानंदपूर्णप्रकाशं ।
उदारं सदारं सुराधारमीशं
परं ज्योतिरूपं भजे भूतनाथं ॥1॥

विभुं वेदवेदांतवेद्यं वरिष्ठं
विभूतिप्रदं विश्रुतं ब्रह्मनिष्ठं ।
विभास्वत्प्रभावप्रभं पुष्कलेषुं
परं ज्योतिरूपं भजे भूतनाथं ॥2॥

परित्राणदक्षं परब्रह्मसूत्रं
स्फुरच्चारुगात्रं भवध्वांतमित्रं ।
परं प्रेमपात्रं पवित्रं विचित्रं
परं ज्योतिरूपं भजे भूतनाथं ॥3॥

परेशं प्रभुं पूर्णकारुण्यरूपं
गिरीशाधिपीठोज्ज्वलच्चारुदीपं ।
सुरेशादि संसेवितं सुप्रतापं
परं ज्योतिरूपं भजे भूतनाथं ॥4॥

गुरुं पूर्णलावण्यपादादिकेशं
गरिष्ठं महाकोटिसूर्यप्रकाशं ।
करांभोरुहन्यस्तवेत्रं सुरेशं
परं ज्योतिरूपं भजे भूतनाथं ॥5॥

हरीशानसंयुक्तशक्त्येकवीरं
किरातावतारं कृपापांगपूरं ।
किरीटावतंसोज्ज्वलत्पिंछभारं
परं ज्योतिरूपं भजे भूतनाथं ॥6॥

महायोगपीठे ज्वलंतं महांतं
महावाक्यसारोपदेशं सुशांतं ।
महर्षिप्रहर्षप्रदं ज्ञानकंदं
परं ज्योतिरूपं भजे भूतनाथं ॥7॥

महारण्यमन्मानसांतर्निवासा-
नहंकार दुर्वारहिंस्रान्मृगादीन् ।
निहंतुं किरातावतारं चरंतं
परं ज्योतिरूपं भजे भूतनाथं ॥8॥

पृथिव्यादि भूतप्रपंचांतरस्थं
पृथग्भूतचैतन्यजन्यं प्रशस्तं ।
प्रधानं प्रमाणं पुराणं प्रसिद्धं
परं ज्योतिरूपं भजे भूतनाथं ॥9॥

जगज्जीवनं पावनं भावनीयं
जगद्व्यापकं दीपकं मोहनीयं ।
सुखाधारमाधारभूतं तुरीयं
परं ज्योतिरूपं भजे भूतनाथं ॥10॥

इहामुत्रसत्सौख्यसंपन्निधानं
महद्योनिमव्याहृतात्माभिधानं ।
अहः पुंडरीकाननं दीप्यमानं
परं ज्योतिरूपं भजे भूतनाथं ॥11॥

त्रिकालस्थितं सुस्थिरं ज्ञानसंस्थं
त्रिधामत्रिमूर्त्यात्मकं ब्रह्मसंस्थं ।
त्रयीमूर्तिमार्तिछिदं शक्तियुक्तं
परं ज्योतिरूपं भजे भूतनाथं ॥12॥

इडां पिंगळां सत्सुषुम्नां विशंतं
स्फुटं ब्रह्मरंध्रस्वतंत्रं सुशांतं ।
दृढं नित्य निर्वाणमुद्भासयंतं
परं ज्योतिरूपं भजे भूतनाथं ॥13॥

अनुब्रह्मपर्यंतजीवैक्यबिंबं
गुणाकारमत्यंतभक्तानुकंपं ।
अनर्घं शुभोदर्कमात्मावलंबं
परं ज्योतिरूपं भजे भूतनाथं ॥14॥

इति शास्त्रा भुजंग स्तोत्रं संपूर्णं ॥